# मंत्रपुष्पांजली

Mantra Pushpanjali — Flower Offering Mantra

ॐ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन्|
ते हं नाकं महिमान: सचंत यत्र पूर्वे साध्या: संति देवा:

ॐ राजाधिराजाय प्रसह्य साहिने ।
नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान् कामकामाय मह्यम् ।
कामेश्वरो वैश्रवणो ददातु ।
कुबेराय वैश्रवणाय ।महाराजाय नमः ॥

ॐ स्वस्ति ।साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं
माहाराज्यमाधिपत्यमयं समंतपर्यायी स्यात् सार्वभौमः सार्वायुष आंतादापरार्धात् ।
पृथिव्यै समुद्रपर्यंता या एकराळिति ।
तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ।
आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥

ॐ एकदंताय विद्महे वक्रतुंडाय धीमहि ।
तन्नो दंती प्रचोदयात् ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

ॐ दिगंबराय विद्महे वासुदेवाय धीमहि ।

तन्नो दत्तः प्रचोदयात् ॥

ॐ कात्यायनाय विद्महे कन्याकुमारि धीमहि ।

तन्नो दुर्गिः प्रचोदयात् ॥

मंत्रपुष्पांजली समर्पयामि ॥